# shrIlakShmyaShTottarashatanAmastotram

# શ્રીલક્ષ્મ્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : lakShmyaShTottarashatanAmastotram

File name : laxmi108naama.itx

Category : aShTottarashatanAma, devii, lakShmI, devI

Location : doc_devii

Author : Traditional

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : July 21, 2004

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 20, 2022

*sanskritdocuments.org*

# શ્રીલક્ષ્મ્યષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
દેવ્યુવાચ
દેવદેવ મહાદેવ ત્રિકાલજ્ઞ મહેશ્વર ।
કરુણાકર દેવેશ ભક્તાનુગ્રહકારક ॥ ૧॥

અષ્ટોત્તરશતં લક્ષ્મ્યાઃ શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
ઈશ્વર ઉવાચ
દેવિ સાધુ મહાભાગે મહાભાગ્યપ્રદાયકમ્ ।
સર્વૈશ્વર્યકરં પુણ્યં સર્વપાપપ્રણાશનમ્ ॥ ૨॥

સર્વદારિદ્ર્યશમનં શ્રવણાદ્ભુક્તિમુક્તિદમ્ ।
રાજવશ્યકરં દિવ્યં ગુહ્યાદ્ગુહ્યતમં પરમ્ ॥ ૩॥

દુર્લભં સર્વદેવાનાં ચતુઃષષ્ટિકલાસ્પદમ્ ।
પદ્માદીનાં વરાન્તાનાં વિધીનાં નિત્યદાયકમ્ ॥ ૪॥

સમસ્તદેવસંસેવ્યમણિમાદ્યષ્ટસિદ્ધિદમ્ ।
કિમત્ર બહુનોક્તેન દેવી પ્રત્યક્ષદાયકમ્ ॥ ૫॥

તવ પ્રીત્યાદ્ય વક્ષ્યામિ સમાહિતમનાઃ શ઼ૃણુમ્ ।
અષ્ટોત્તરશતસ્યાસ્ય મહાલક્ષ્મીસ્તુ દેવતા ॥ ૬॥

ક્લીંબીજપદમિત્યુક્તં શક્તિસ્તુ ભુવનેશ્વરી ।
અઙ્ગન્યાસઃ કરન્યાસ સ ઇત્યાદિઃ પ્રકીર્તિતઃ ॥ ૭॥

ધ્યાનમ્ -
વન્દે પદ્મકરાં પ્રસન્નવદનાં સૌભાગ્યદાં ભાગ્યદાં
હસ્તાભ્યામભયપ્રદાં મણિગણૈર્નાનાવિધૈર્ભૂષિતામ્ ।
ભક્તાભીષ્ટફલપ્રદાં હરિહરબ્રહ્માદિભિઃ સેવિતાં
પાર્શ્વે પઙ્કજશઙ્ખપદ્મનિધિભિર્યુક્તાં સદા શક્તિભિઃ ॥ ૮॥

સરસિજનયને સરોજહસ્તે ધવલતરાંશુકગન્ધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે ત્રિભુવનભૂતિકરિ પ્રસીદ મહ્યમ્ ॥ ૯॥

ૐ પ્રકૃતિં વિકૃતિં વિદ્યાં સર્વભૂતહિતપ્રદામ્ ।
શ્રદ્ધાં વિભૂતિં સુરભિં નમામિ પરમાત્મિકામ્ ॥ ૧૦॥

વાચં પદ્માલયાં પદ્માં શુચિં સ્વાહાં સ્વધાં સુધામ્ ।
ધન્યાં હિરણ્મયીં લક્ષ્મીં નિત્યપુષ્ટાં વિભાવરીમ્ ॥ ૧૧॥

અદિતિં ચ દિતિં દીપ્તાં વસુધાં વસુધારિણીમ્ ।
નમામિ કમલાં કાન્તાં કામાક્ષીં ક્રોધસમ્ભવામ્ ॥ ૧૨॥ var કામા ક્ષીરોદસમ્ભવામ્

અનુગ્રહપદાં બુદ્ધિમનઘાં હરિવલ્લભામ્ ।
અશોકામમૃતાં દીપ્તાં લોકશોકવિનાશિનીમ્ ॥ ૧૩॥

નમામિ ધર્મનિલયાં કરુણાં લોકમાતરમ્ ।
પદ્મપ્રિયાં પદ્મહસ્તાં પદ્માક્ષીં પદ્મસુન્દરીમ્ ॥ ૧૪॥

પદ્મોદ્ભવાં પદ્મમુખીં પદ્મનાભપ્રિયાં રમામ્ ।
પદ્મમાલાધરાં દેવીં પદ્મિનીં પદ્મગન્ધિનીમ્ ॥ ૧૫॥

પુણ્યગન્ધાં સુપ્રસન્નાં પ્રસાદાભિમુખીં પ્રભામ્ ।
નમામિ ચન્દ્રવદનાં ચન્દ્રાં ચન્દ્રસહોદરીમ્ ॥ ૧૬॥

ચતુર્ભુજાં ચન્દ્રરૂપામિન્દિરામિન્દુશીતલામ્ ।
આહ્લાદજનનીં પુષ્ટિં શિવાં શિવકરીં સતીમ્ ॥ ૧૭॥

વિમલાં વિશ્વજનનીં તુષ્ટિં દારિદ્ર્યનાશિનીમ્ ।
પ્રીતિપુષ્કરિણીં શાન્તાં શુક્લમાલ્યામ્બરાં શ્રિયમ્ ॥ ૧૮॥

ભાસ્કરીં બિલ્વનિલયાં વરારોહાં યશસ્વિનીમ્ ।
વસુન્ધરામુદારાઙ્ગીં હરિણીં હેમમાલિનીમ્ ॥ ૧૯॥ (વસુન્ધરામુદારાઙ્ગાં)

ધનધાન્યકરીં સિદ્ધિં સદા સૌમ્યાં શુભપ્રદામ્ ।
નૃપવેશ્મગતાનન્દાં વરલક્ષ્મીં વસુપ્રદામ્ ॥ ૨૦॥

શુભાં હિરણ્યપ્રાકારાં સમુદ્રતનયાં જયામ્ ।
નમામિ મઙ્ગલાં દેવીં વિષ્ણુવક્ષઃસ્થલસ્થિતામ્ ॥ ૨૧॥

વિષ્ણુપત્નીં પ્રસન્નાક્ષીં નારાયણસમાશ્રિતામ્ ।
દારિદ્ર્યધ્વંસિનીં દેવીં સર્વોપદ્રવહારિણીમ્ ॥ ૨૨॥

નવદુર્ગાં મહાકાલીં બ્રહ્મવિષ્ણુશિવાત્મિકામ્ ।
ત્રિકાલજ્ઞાનસમ્પન્નાં નમામિ ભુવનેશ્વરીમ્ ॥ ૨૩॥

લક્ષ્મીં ક્ષીરસમુદ્રરાજતનયાં શ્રીરઙ્ગધામેશ્વરીં
    દાસીભૂતસમસ્તદેવવનિતાં લોકૈકદીપાઙ્કુરામ્ ।
શ્રીમન્મન્દકટાક્ષલબ્ધવિભવદ્બ્રહ્મેન્દ્રગઙ્ગાધરાં
    ત્વાં ત્રૈલોક્યકુટુમ્બિનીં સરસિજાં વન્દે મુકુન્દપ્રિયામ્ ॥ ૨૪॥

માતર્નમામિ કમલે કમલાયતાક્ષિ
શ્રીવિષ્ણુહૃત્કમલવાસિનિ વિશ્વમાતઃ ।
ક્ષીરોદજે કમલકોમલગર્ભગૌરિ લક્ષ્મિ
પ્રસીદ સતતં નમતાં શરણ્યે ॥ ૨૫॥

ત્રિકાલં યો જપેદ્વિદ્વાન્ ષણ્માસં વિજિતેન્દ્રિયઃ ।
દારિદ્ર્યધ્વંસનં કૃત્વા સર્વમાપ્નોત્યયત્નતઃ ॥ ૨૬॥

દેવીનામસહસ્રેષુ પુણ્યમષ્ટોત્તરં શતમ્ ।
યેન શ્રિયમવાપ્નોતિ કોટિજન્મદરિદ્રતઃ ॥ ૨૭॥

ભૃગુવારે શતં ધીમાન્ પઠેદ્વત્સરમાત્રકમ્ ।
અષ્ટૈશ્વર્યમવાપ્નોતિ કુબેર ઇવ ભૂતલે ॥ ૨૮॥

દારિદ્ર્યમોચનં નામ સ્તોત્રમમ્બાપરં શતમ્ ।
યેન શ્રિયમવાપ્નોતિ કોટિજન્મદરિદ્રિતઃ ॥ ૨૯॥

ભુક્ત્વા તુ વિપુલાન્ ભોગાનસ્યાઃ સાયુજ્યમાપ્નુયાત્ ।
પ્રાતઃકાલે પઠેન્નિત્યં સર્વદુઃખોપશાન્તયે ।
પઠંસ્તુ ચિન્તયેદ્દેવીં સર્વાભરણભૂષિતામ્ ॥ ૩૦॥

॥ ઇતિ શ્રીલક્ષ્મ્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrIlakShmyaShTottarashatanAmastotram*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*